LVI-11

# वेदस्य व्याकरणशास्त्रोपयोगिता

**डा. वि. के. शैलजा।**
रीडर्-व्याकरणविभागाध्यक्षा
राष्ट्रीय संस्कृतसंस्थानम्
मानित विश्वविद्यालयः
गुरुवायूर् परिसरः
पुरनाट्टुकरा, तृश्शूर् -६८०५५१.

विद्-ज्ञाने इत्यस्मात् धातोः अच् प्रत्यये ज्ञानार्थक वेद शब्दस्य निष्पत्तिः। लौकिकमायायां निष्णातानां सर्वेषामपि वेदे अन्तर्भावः। तच्च वेदः ब्रह्मणः प्राप्त्युपाय एव। ब्रह्म इत्यनेन शब्दानां सत्यभूत अथवा स्फोटरूप शब्दस्यैव ग्रहणम्। स्फुटत्यर्थो अस्मादिति स्फोटः वाचकः अथवा बोधकः इत्यर्थः। अर्थबोधकः शब्दः स्फोट इत्युच्यते। तच्च स्फोटः अष्टधा भवति। वर्णपद वाक्य भेदेन जाति व्यक्तिभेदेन अखण्डपद स्फोटं अखण्डवाक्य स्फोटञ्चेति अष्टधा। अत्र अर्थस्य सम्पूर्णस्य अवगतिः अखण्डवाक्यस्फोटात् जायते इत्यतः तदेव परममित्युच्यते। तत्र वाचां चतुरवस्था। परा-पश्यन्ती-मध्यमा-वैखरीचेति। तत्र पश्यन्तीरूपा वाक् ब्रह्मेत्युच्यते। आत्मा अथवा अन्तःकरणं संस्काररूपेण स्वगतानर्थान् बुद्धा स्ववृत्या समेत्य एकबुद्धि विषयान् कृत्वा तद् बोधनेच्छया मनो युक्तं करोति। तदिच्छावान् मनः कायाग्निं जाठराग्निम् अभिहन्ति। सकायाग्निः सोदीर्णः स मारुतः उदीर्णः ऊर्ध्वं प्रेरितः। एवञ्च शब्दप्रयोगेच्छयोत्पन्नाभिहिताग्निना नाभिप्रदेशात् प्रेरितो वायुः वेगात् मूर्धपर्यन्तङ्गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य स्पृष्टादि आभ्यन्तर प्रयत्न बाह्यप्रयत्नयोः साहाय्येन तत्तत्स्थानेषु जीह्वाग्रादि स्पर्श पूर्वकं तत्तत् स्थानान्याहत्य वर्णानभिव्यनक्ति। एवं वाचः चतुरवस्था। परा अवस्था अर्थबोधनेच्छायां नाभिनिष्टो वायुः। पश्यन्ती वाक् तु ततः ऊर्ध्वगामी। तच्च ऋषीणां ज्ञानगोचर निष्टाः हृदयान्तरि प्राप्ता वाक् मध्यमा। ततः ऊर्ध्वगामी वाक् तत्तत् स्थानेष्वाहत्य बहि निस्सरन्ती वैखरीत्युच्यते। तदेव वाक् अस्मादृशानां गोचरीभूताः। तथा ऋषीणां सर्वज्ञानवतां गोचरीभूता पश्यन्ती वाक् ब्रह्म इत्युच्यते।

तच्च ब्रह्मणः नित्यत्वम् एकत्वञ्च। उत्पन्ति विनाशरहितत्वात् आद्यन्तरहितत्वात् नित्यत्वम्। नित्यं नाम कूटस्थैरविचालिभिर्वैर्णः भवितव्यम् अनपाय उपजनविकारिभिः इति महाभाष्यकारेणोक्तम् । एवञ्चेदं ब्रह्म अयं पूर्वः अयं परः इत्यादि पूर्वापरीभावरहितमित्यतः उपसंहतक्रमम्। तद्वत् अक्षरस्य विभक्तककारादिवर्ण रूपाया वैखरीवाचो निमिलं भवति। तच्च ब्रह्म अर्थभावेन विचित्र घटपटादिरूपेण विवर्तते। एवञ्चैतत् विकारजातस्य जगतः प्रक्रिया शब्दतत्वं ब्रह्म। अथवा पश्यन्ती वाग्रूपं ब्रह्म। सर्व ग्राह्य ग्राहकाकारवर्जिता अपरिच्छिन्ना सर्वतः संहृतक्रमञ्च पश्यन्ती वाक् ब्रह्मेति यावत्। तदेव अन्तः पश्यदवस्थया भोक्तृ रूपया विशिष्टं ज्ञेयरूप शून्यं चैतन्यमात्रं जीव इत्यभिधीयते। स एव च पश्यन्ती वाग् शब्दः अर्थप्रतिपादनेच्छया उपलक्षितो मनोविज्ञान रूपत्वे आस्थितो मध्यमा वागुच्यते। सैव च वक्त्रकुहरं प्राप्ता कण्ठादि स्थान भागेषु विभक्ताकारादि वर्णरूपा वैखरी वागुच्यते। ततः सैव बाह्यार्थवासनया अविद्यारूपया क्रमेण घटपटाद्याकारे र्निवृता चक्षुरादिना गृह्यते। एवञ्च ब्रह्मैव घटपटादिभिन्न भिन्नरूपेण प्रतीयते। तदेव विवर्त इत्युच्यते। "अतत्वतोऽन्यथा भावः विवर्त इत्युच्यते। सतत्वतोऽन्यथाभावः परिणाम" इति च। एकस्यैवब्रह्मणः नानात्व प्रतीतिः विवर्तः, वस्तुतः तदेकैव। किन्तु एकस्य वस्तुनः तत्वतो अन्यथा भावः परिणामः। यथा दुग्धं दधि भवति इति परिणामः। अधिष्टानसमसत्ताककार्यापत्तिः परिणामः, अधिष्टानविषमसत्ताककार्यापत्तिः विवर्त इति च।

एवञ्चैकस्य समस्त जगतां कारणं ब्रह्मा अथवा शब्दब्रह्म एव। "एकमेवाद्वितीयं ब्रह्म", "अद्वैत एक एवाभवत्" इत्यादि श्रुतिभिः ब्रह्मणः एकत्वं प्रतीयते। तदेव घटपटादि विचित्र कार्यजनन योग्यतारूपाणां आश्रयणात् शक्ति गतभेदस्यारोपणात् भिन्नत्व प्रतीतिः। "प्रणव एवैकस्त्रेधा व्यभज्यत" इति श्रुतिना एकस्यैव प्रणवस्य भेदत्रयं सञ्जातम्। तच्च ऋग्यजुस्सामरूपेण विभक्तमासीत्। एवञ्च ब्रह्मणः एकत्वेऽपि तद्गतशक्ति वैचित्र्यभेदमारोप्य विचित्रकार्यजनकत्वम्। शक्तिभेदमाश्रित्य पृथगिव भिन्नमिवावभासते न तु वस्तुतः भिन्नत्वम्। ब्रह्मणः नानाकारावग्रहे एकत्वानुपपात्तिर्नास्ति वृक्षा इति एकस्यामुपलब्धौ नानावृक्षाकारावग्रहसत्वेऽपि यथा ज्ञानस्यैकत्वं नानुपपन्नं तद्वत् ब्रह्मणोऽपि।

सर्वाः कारणशक्तयः कालेन अनुज्ञाताः सत्यः जनयन्ति कार्यम्, प्रतिबद्धाः सत्यो न जनयन्ति कार्यम्, हेमन्तादिकाले प्रतिबद्धाः वसन्तादिकाले अनुज्ञायन्ते इति कालः स्वातन्त्र्यशक्तिः अन्यासाञ्च कालपारतन्त्रयम्। "अतश्च कालसूत्रान्तर्गतं विश्वं प्राप्तकालं प्रसूयते" इति नियमात् जायते-अस्ति-विपरिणमते-वर्धते-हसति-नश्यति इत्यादि षडवस्थाविशेषाः कालशक्तिमाश्रित्य सञ्जायते। औपाधिकभेदमादायैकस्यापि कालस्य क्रमरूपतया क्रमवत् कार्यजनकत्वम्।

यः समस्तजगतां कारणम् तद् ब्रह्म नित्यं एकञ्च। तस्य भिन्नत्वेऽपि अभिन्नत्वम्, एकत्वेऽपि नानात्वम् इत्यादि कारणेन तद् ब्रह्म अनिर्वचनीयमित्युच्यते। तदेव ब्रह्म भोक्तृरूपेण भोक्तव्य रूपेण भोगरूपेण च प्रवर्तते। तत्र भोक्तापुरुषः, भोक्तव्याः विषयाः, भोगः विषयोपभोगजन्य सुखदुःखाद्य नुभवः। अत्र भोक्तृ शब्देन परमात्मनो निस्सृताः कर्मात्मानः ये कर्मणां कर्तारः फलानाञ्च भोक्तारः उच्यन्ते। रूपादयो भोग्याः तेषां परिच्छेदो भोगः। अत एव परमात्मनोऽविकारत्वाद् ग्रन्थयः विवर्तन्ते। भोक्तुः कर्तुत्वेन भोक्तव्यस्य च कर्मत्वेन साधनत्वात् भोग्यस्वभावाद् वैलक्षण्यम्। मम अहम् इति यदास्याहङ्कारग्रन्थिः विवृतो भवति तदाहम्प्रत्ययः। तत्पूर्वको मम प्रत्ययः, ततस्तान्निबन्धनः संसारः। ममाहमित्यहङ्कारसमतिक्रममात्रं ब्रह्मणः प्राप्तिः। विकाराणां प्रकृतिभावपत्तिः

Vijnana Bharati

आगमोऽपि व्याकरणाध्ययनस्य प्रयोजनम्। "ब्राह्मणेन निष्कारणो षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति। तत्र षडङ्गेषु व्याकरणस्य मुख्यत्वात् तदध्ययनम् अवश्यमेव। एवं लाघवार्थमपि व्याकरणस्य प्रमुखं स्थानं विद्यते। "ब्राह्मणेनावश्यं शब्दाः ज्ञेयाः" इति नियमोऽस्ति। अध्यापनं ब्राह्मणस्यवृत्तिः। न चाशब्दज्ञं तमुपश्लिष्यन्ति शिष्याः। लोके वेदे च बहवः शब्दाः सन्ति तेषां प्रतिपदपाठः अद्यत्वे अशक्यमेव। अल्पायुष्मन्तः जनाः बुद्धिसामर्थ्यमपि न्यूनम् इत्यादि बहुकारणेन प्रतिपदपाठस्याशक्यत्वात् लाघवेन शब्दज्ञानाय व्याकरणम् अवश्यमेव। उत्सर्गापवादरूपेण, संज्ञा परिभाषाभेदेन, अधिकार अतिदेशादि रूपेण च साङ्केतिक ज्ञानद्वारा व्याकरणेन शब्दाः प्रतिपत्तुं समर्थाः भवन्ति इत्यतः शब्दप्रतिपत्तौ लाघवार्थं व्याकरणम् आवश्यकम्। एवम् असन्देहार्थमपि व्याकरणमुपयुज्यते। याज्ञिकाः पठन्ति "स्थूलपृषतीमाग्निवारूणीमनड्वाहीमालभेन" इत्यत्र सन्देहः भवति-स्थूला चासौ पृषती चेति समासः उत स्थूलानि वा वृषन्ति यस्याः सा स्थूलपृषतीति वा समासः कर्तव्यः इत्यत्र सन्देहः। यदि पूर्वपद प्रकृति स्वरत्वं तथा बहुव्रीहिः, अथ अन्तोदान्तत्वं ततः तत्पुरुषः इति। एवम् अत्र सन्देह निवृत्यर्थं व्याकरण ज्ञानमवश्यमेव।

भर्तृहरिमहोदयः वाक्यपदीये एवमुक्तम्-

"आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।
प्रथमं छन्दसामङ्गमाहुव्यकिरणं बुधा।।" इति

तपो हि दुःखात्मकम् , पूर्वप्रकृतस्यैव तत्फलो धर्मक्षय हेतुः, तत्फलं पूर्वकृतस्य अधर्मस्य क्षयः। व्याकरण अध्ययनाच्च भूयान् दुःखम् इत्युत्तमे व्याकरणे दुःखहेतुत्वात् तपः। शब्दब्रह्मणः स्वरूप संस्कारः साधुत्वप्रतिपत्यर्थः तदासन्नं साक्षादुपकारि। इदमूह्यम् इदमनूह्यम् इति न्यायादवस्थिते सम्यक् विपरिणतौ लिङ्गवचनादीनां व्याकरणं निबन्धनमिति। यानि लोके तपस्त्वेनाभिख्यातानि ब्रह्मचर्यम् अधः शयनम् उदवास-चान्द्रायणादीनि, ये च पवित्रतमा स्वाध्यायास्तेषामिदं दृष्टादृष्टविशेष फल हेतुत्वा दभिख्याततमं तपः। यस्याक्षरसमाम्नायस्य ज्ञानमात्रेण सर्ववेदपारायणजं पुण्य फलावाप्तिरागमेन स्मर्यते तच्छन्दसां प्रथममङ्गं प्रधानत्वात्। प्रधाने च षड्स्वङ्गेषु व्याकरणं, प्रधाने च कृतो यत्नः फलवान् भवति। सनकाद्युद्धरणेच्छयाऽस्य व्याकरणस्य ब्रह्मोपदेशत्वम्। तच्च श्रुतित्वाभावे न सङ्गच्छते, श्रोतव्यः श्रुतिवाक्येभ्यः इत्युक्तेः व्याकरणस्य श्रुतित्वम्। ऋक्तन्त्र व्याकरणे शाकटायनोऽपि एवमुच्यते "इदमक्षरछन्दो वर्णशः समनुक्रान्तं यथा आचार्या ऊचुः- ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय, भरद्वाज-ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः। तं खल्विममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयात् ब्रह्मराशिः" इति। ब्रह्मराशिरित्यनेन ब्रह्मप्रतिपादको वर्णराशिः इत्यर्थः। मन्त्रोपदेश इतिवत् अक्षरसमाम्नायस्योपदेशः महेश्वरेण कृतम्। अत एव तन्मूलकस्य अस्य ज्ञाने सर्ववेद पारायणजं पुण्यं फलं सिद्धति। अत एव व्याकरणमुपक्रम्य "वेदानां वेदः" इत्युक्तं छन्दोगश्रुतौ।

सर्वो हि व्यवहारः शब्दमूलः। न हि शब्दमनुच्चार्य कश्चिद्व्यवहर्तुं शक्नोति। व्याकरणादेव शब्दानां तत्वावबोधः अथवा निश्चयः सञ्जायते न तु श्रोत्रादिभ्यः। शब्दस्यैतदेव वैकल्यं यदपगतसंस्कारत्वम्, अन्यार्थबोधकत्वं वा। शब्दस्य द्वे रूपे, शब्दत्वं साधुत्वञ्च। तत्र शब्दत्वस्य श्रोत्रेन्द्रियग्राह्यत्वेऽपि साधुत्वं व्याकरणेनैव गृह्यते। व्याकरणं अपवर्गसंपादनरूपमपि भवति। व्याकरणाध्ययनम् अपवर्गस्य मोक्षप्राप्तेः उपाय एव। साधु शब्दज्ञानपूर्वक साधुशब्दप्रयोगात् अभिव्यक्त धर्मविशेषः महान्तं शब्दात्मानं प्राप्नोति। व्याकरणेन संस्कृतचेतसा पूर्वं वैखरीद्वारा मध्यामामधिगम्य वाग्विकाराणां प्रकृतिं समस्त शब्दार्थकारण भूतामावृतां पश्यन्तीमनुगच्छति ततः शब्दपूर्व योगाभ्यास भावनावशात् अनावृतां विशुद्धां पश्यन्तीं पराख्यां प्राप्नोतीति तत्प्राप्तिश्च तत् तादात्म्यं तदेवापर्गः। अत एवोच्यते-

"अपि प्रयोकुरात्मानं शब्दमन्तरवस्थितम्।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते"।। इति।

प्रत्यवायजनक अपभ्रंश प्रयोग रूपस्य अपवर्ग प्रतिबन्धकस्य अपनयनाय व्याकरणम् आवश्यकम्। व्याकरण ज्ञानेन साधु शब्दानां ज्ञानं जायते इत्यतः पुण्यजनकत्वम्। अत एव महाभाष्ये उच्यते

"यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान् यथावत् व्यवहारकाले
सोऽनन्तमाप्नोति जयं परत्र
वागयोगवित् दुष्यति चापशब्दैः"।।

एतच्च व्याकरणं वाङ्मलानां चिकित्सितम् भवति। प्रत्यवाय हेतूनां वाचो मलानां दुरुच्चारणरूपाणां चिकित्सितं भवति। यथा आयुर्वेदः शरीराणाम् दोषनिवारणं करोति तद्वत् व्याकरणं वाचो मलानि दूरीकरोति। अपि चैतत् व्याकरणं सर्वविद्यासु पवित्रं भवति। अपभ्रंश प्रयोगाभावाय अपेक्ष्यते इत्यतः अस्य प्राधान्यम्। तदुच्यते

"आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमम् च मन्त्राः।
तेषाञ्च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः"।। इति।

घटादिशब्दानामाकृतयो घटशब्दत्वादयो निबन्धनम् अथवा बोधकं ते अर्थगतजातीनां शक्यत्वं शब्दगतजातीनाञ्च शक्तत्वम्। अर्थगतजातीनां बोधः शब्दादेव जायते। "लोकावगत सामर्थ्यः शब्दो वेदेऽपि बोधकः" - इति न्यायात् लोके शक्ति ग्रहस्य व्याकरणाधीनत्वम्। अतः व्याकरणं अपवर्गद्वारं भवति।

एवमस्य व्याकरण शस्त्रस्य शक्ति ग्रहापेक्षितत्ववत् साक्षात् शब्दब्रह्म साक्षात्कारजनकत्वमप्यस्ति। इदं व्याकरणं सिद्धेः अथवा मोक्षस्य या अन्तरालावस्थाः तत्प्राप्तौ सोपानतुल्यत्वात् आद्यं पदस्थानं भवति। मुमुक्षुणां कृते व्याकरणजाध्ययनेन साधुशब्द ज्ञानं सञ्जायते। शास्त्रज्ञानपूर्वक साधुशब्द प्रयोगेण अदृष्टरूपं पुण्यं फलमवाप्नोति। तेनक्षीणपापः सन् सर्वज्ञानसंयुक्तः मोक्षमाप्नुवन्ति। "आत्मावारे दृष्टव्यो मन्तव्यो निदिध्यासितव्यं" इति श्रुत्या प्रत्यगात्मसाक्षात्कारस्यैव मोक्षहेतुत्वम्। व्याकरणं तु छन्दसाक्षात्कार साधकं भवति इत्यतः तस्य मोक्षहेतुत्वं कथम् इति चेत् शब्दस्यैव प्रत्यगात्मरूपत्वम् इति कारणेन एवं विध व्याकरणस्य मोक्षहेतुत्वमस्त्येव। व्याकरणेन नष्ट विपर्यासः सन् साधु शब्दज्ञानेन अर्थविपर्यासः सञ्जायते। स्थूलपृषतीमित्यादौ यथार्थावबोधे सति उदात्तादि ज्ञानेन अपगत शब्दार्थ विपर्यास- ततः वेदार्थ ग्रहण समर्थः आत्मा वेदानां योनिं छन्दोरूपां केवलाम् शुद्धाम् अपभ्रंश विविक्ताम् तनुं सूक्ष्मां स्वरूपभूतां वा प्रणवरूपां पश्यति। शब्दब्रह्मणः एव विवर्तो जीवः- "स एव जीवो विवरप्रसूतिः" इति भागवदात्। तथा च शब्दसाक्षात्कार एव आत्मसाक्षात्कारः। ततश्च व्याकरणस्य मोक्षहेतुत्वमस्त्येव। एवं छन्दस्यः आत्मा व्याकरणादपगत शब्दार्थविपर्यासः छन्दोमयीं तनुं परमं वेदरूपं पश्यति। एवं शुद्धमपि ब्रह्मा विद्यावशात् ज्योतिरात्मना शब्दत्मना विवर्तते। उपसंहतक्रमाया वाचः उत्तमम् अविवृत्तं रूपं परब्रह्माख्यं शुद्धं मायोपप्लवरहितं ज्योतिः प्रकाशाप्रकाशयोः प्रकाशकं शब्दाख्यं तत् अस्मिन्नेव तमसि वैकृतध्वनिरूपे तमसि आच्छादितं विवर्तते। तत्र प्राकृतवैकृतभेदेन ध्वनेः द्वैविध्यम्। तत्र प्राकृतेत्यनेन स्फोटाभिव्यञ्जकध्वनिः।

एवं विध स्फोटाख्ये शब्दब्रह्मणि ऋग्यजुस्सामाथर्वणाम् उदात्तानुदात्तादि वर्णधर्मत्वेन भासमानाः पृथक् स्फोटभिन्ने तदभिव्यञ्जके ध्वनौ वायुसंयोगे स्वीकारः। ते स्फोटाभिव्यञ्जकध्वनिनिष्ठा ध्वन्यभिव्यञ्जकवायुसंयोगनिष्ठा ध्वनिः भिन्नत्वेन प्रतीयते। एवं कल्पितविरुद्धधर्माद्यासात् स्फोटस्य नानात्वप्रतीतिः। न्यायसांख्यवेदान्तादि दर्शनैः कालापशाकटायनादि व्याकरणभेदैश्च बहुविधाकर्तृत्वोदासीनत्वविवर्तोपादानत्वादिना वर्णपदवाक्यादिभेदेन निरूप्यते। तद् परंब्रह्म प्रणवरूपं व्याकरणमागम्य मध्यमादि वाग्ज्ञानद्वारा अधिगम्यते। जगत् कारणस्य "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" "ब्रह्मैवेदं सर्वम्," "आत्मैवेदं सर्वम्" इत्यादि श्रुतिभिः सत्यत्वमेकत्वं ब्रह्मत्वमात्मत्वञ्च यथा प्रतिपद्यते तथा "वागेवार्थं ब्रवीति वागेवार्थं निहितं सन्तनोति। वाच्येव विश्वं बहुरूपं निबद्धं तदेतदे कं प्रविभज्योपभुङ्क्ते" "ओमित्येतदक्षरमिदं सर्वम् ", "ओमितिब्रह्म", "ओमितीदं सर्वम्" , "वाचो ह वाक्" इत्यादि श्रुतिभिः शब्दरूपतापि प्रतिपाद्यते इति शब्दब्रह्मैव जगत् कारणम्।

शब्दतत्वाख्यं ब्रह्म प्रथमं स्वलिङ्गं त्रिमात्रमोङ्कारं ततोऽक्षरसमाम्नायं ततश्चतुरोवेदान् विरच्य सर्वं जगद्शरीरमरचत्। तदुक्तं श्रीमद् भागवते-

"अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।।
नामरूपञ्च भूतानां कर्मणाञ्च प्रवर्तनम् ।
वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः।।" इति।

शब्दतत्वाख्यं ब्रह्म च सूक्ष्मप्रणवरूपं परब्रह्मपदेन त्रिमात्रमोङ्कारञ्च अपरब्रह्मपदेन, शब्दब्रह्मपदेन च व्यपदिशन्ति पुराविदः। तथा च श्रुतिः "एतद्वै सत्यकामपरं चापरं च ब्रह्म यदोङ्कारः।" एतेन परब्रह्मसाधनेन ओङ्कारेण एकतरं परब्रह्म अनुगच्छति नेदिष्टं ह्यालम्बनं परब्रह्मणो यदोङ्कारः। अत एव "द्वेब्रह्मणिवेदितव्ये शब्दब्रह्म परं च तद् । शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति।" वैयाकरणैः परंब्रह्मैव शब्दब्रह्म पदेनोच्यते एवं व्याकरणशास्त्रं वेदस्य सम्यक्ज्ञानाय सर्वथा उपयोगी।

Vijnana Bharati